प्रयोजकादीनां पादपादहानिर्द्रष्टव्या। बालवृद्धस्त्रीणामर्द्धादिकं प्रायश्चित्तम्। इति प्रायश्चित्तविवेकः ॥ * ॥ अथ पुराणे ब्राह्मणस्य मद्यपानादिनिषेधो यथा,—

"अग्नेयञ्चाप्यपेयञ्च तथैवास्पृश्यमेव च।
द्विजातीनामनालोच्यं नित्यं मद्यमिति स्थितम् ॥
तस्मात् सर्व्वं प्रयत्नेन मद्यं नित्यं विवर्ज्जयेत्।
पीत्वा पतति कर्म्मभ्यस्त्वसम्भाष्यो द्विजोत्तमः ॥
भक्षयित्वाप्यभक्ष्याणि पीत्वापेयान्यपि द्विजः।
नाधिकारी भवेत्तावद्यावत्तन्न जहात्यधः ॥
तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नतः।
अपेयानि च विप्रो वै पीत्वा तद्याति रौरवम् ॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः ॥
मद्यपस्य विष्णोरुपसर्पणे दोषादि यथा,—

वराह उवाच।
"मद्यं पीत्वा वरारोहे! यस्तु मामुपसर्पति।
तत्र दोषं प्रवक्ष्यामि शृणु सुन्दरि! तत्त्वतः ॥
दत्त्वा वर्षसहस्राणि दरिद्रो जायते पुनः।
ततो भवेत् स पूतात्मा मद्भक्तश्च न संशयः ॥
यस्तु भागवतो भूत्वा कामरागेण मोहितः।
दीक्षितो पिबते मद्यं प्रायश्चित्तं न विद्यते ॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!।
अग्निवर्णां सुरां पीत्वा तेन मुच्येत किल्बिषात् ॥
एवञ्चैवापराधानि येन मुच्यन्ति किल्बिषात्।
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
न स लिप्यति पापेन संसारञ्च न गच्छति ॥
इति वराहपुराणे मद्यपानापराधप्रायश्चित्तम् ॥

अपि च।
"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
शुद्ध्येच्चान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः।
वैश्यः सान्तपनाच्छूद्रः पञ्चाहोभिर्व्विशुद्ध्यति ॥"

इति गारुडे २२ अध्यायः ॥

एतद्गौडीमाध्व्योः कामतः सकृत्पानविषयमिति प्रायश्चित्तविवेकदर्शनात् ॥ * ॥ द्विजस्य पूजादौ मद्यदानविध्यनुकल्पनिषेधा यथा,—

"मदिरां प्रस्तुतो दद्यात् अन्यत् पानन्तु वामतः।
अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः ॥
नारिकेलजलं कांस्ये ताम्रे वा विसृजेन्मधु।
नापद्यपि द्विजो मद्यं कदाचित् विसृजेदपि ॥
ऋते पुष्पासवाद्दुग्धाद्द्राक्षणाद्वा विशेषतः।
राजपुत्त्रस्तथा मर्त्त्यः क्षत्त्रियः शौण्डिकादयः ॥
दद्युर्नरबलिं भूपस्वत्वा विभवाय च।
भूपालानुमते मद्यं ददत् पापमवाप्नुयात् ॥"

इति कालिकापुराणे ६६ अध्यायः ॥

अथ ब्राह्मणस्य मद्यपाननिषेधकशुक्रशापो यथा,

वैशम्पायन उवाच।
"सुरापानाद्वञ्चनां प्राप्य विद्वान्
संज्ञानाशं प्राप्य चैवातिघोरम्।
दृष्ट्वा कचञ्चापि तथाभिरूपं
पीतं तथा सुरया मोहितेन ॥
समन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षुः।
काव्यः स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातशङ्कः ॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धिः।
अपेतधर्म्मा ब्रह्महा चैव स स्या-
दस्मिँल्लोके गर्हितः स्यात् परे च।
मया चेमां विप्रधर्म्मोक्तसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके।
सन्तो विप्राः शुश्रुवांसो गुरूणां
देवा लोकाश्चोपशृण्वन्तु सर्व्वे ॥"

इति महाभारते आदिपर्व्वणि ७६ अध्यायः ॥

अथ तन्त्रे मद्यपाननिषेधो यथा,—

"नारिकेलञ्च खार्ज्जूरं पानसञ्च तथैव च।
ऐक्षवं मधुकं टाङ्कं तालञ्चैव च माक्षिकम् ॥
द्राक्षन्तु दशमं ज्ञेयं गौड़ं चैकादशं स्मृतम्।
पैष्टन्तु द्वादशं प्रोक्तं सर्व्वेषामधमं स्मृतम् ॥
मध्यमं मधुजं गौड़ं शेषञ्चोत्तममिष्यते।
एतत् द्वादशकं मद्यं न पातव्यं द्विजैः क्वचित्।
क्षत्त्रियादिः पिबेत् सर्व्वं पैष्टीमेकान्तु वर्ज्जयेत् ॥
सुरां पीत्वा द्विजो मोहात् कामात् तक्रादि-
मिश्रिताम्।
त्रैवार्षिकं व्रतं कुर्य्याद्दीपन्मिश्रे तु वार्षिकम् ॥
तक्रादिमिश्रितां किञ्चित् सुरां पीत्वा त्वकामतः।
कृच्छ्राब्दपादमुक्तश्च पुनः संस्कारमर्हति ॥
सुखप्रवेशमात्रन्तु प्रायश्चित्तार्द्धमाचरेत्।
अनुपनीतो देवेशि! व्रतं त्रैवार्षिकं चरेत् ॥
चतुर्थकालाहारी स्याद्ब्रह्मचर्य्यमथापि वा।
आ पञ्च वर्षं त्र्यहं वा ज्ञानादर्द्धं विनिर्द्दिशेत् ॥
शूद्रस्य च विशेषेण अतिकृच्छ्रद्वयं चरेत्।
स्वजातिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत् ॥
पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते।
माध्वीगौड़ीसुरापाने द्वादशाब्दं विधीयते ॥
इतरेषान्तु पानेन शुद्धिश्चान्द्रायणेन तु।
राजन्यवैश्ययोश्चापि गौड़ी माध्वी न शस्यते।
मोहात् क्षत्त्रश्च वैश्यश्च पीत्वा कृच्छ्रद्वयं चरेत्॥
शूद्रोऽपि गौड़ीं पैष्टीञ्च न पिबेद्धीनसंस्कृताम्।
कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत्॥
चरेच्चान्द्रायणं ज्ञानात् क्षत्त्रियो वैश्य एव च।
पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्द्दिशेत् ॥
ज्ञानादभ्यासयोगे तु चान्द्रायणत्रयं स्मृतम्।
नारिकेलं तथा ज्ञानाद्विप्रश्चान्द्रायणेन तु।
क्षत्त्रियश्चैव वैश्यश्च प्राणायामेन शुध्यति ॥
अपक्वं पनसञ्चैव आम्रञ्च वदरं तथा।
स्थापयित्वा घटे नित्यं दद्यादामपयःपलम् ॥
त्रैलोक्यविजयाञ्चैव मातुलङ्गं तथैव च।
सप्तमेऽहनि ततो दद्यात् सन्धानात् सत्वमीरितम् ॥
दधि मधु घृतञ्चापि माञ्जिष्ठं तिक्तकं तथा।
अनुपाने तु देवेशि! द्राक्षमद्यं सुनिश्चितम् ॥
विड़ङ्गं शालवो मूलं——————।
मधुना सह संस्थाप्य शेषपाकं समाचरेत् ॥
पिप्पलीलवणं दत्त्वा मधुना मद्यमीरितम्।
पानसं पक्वखर्ज्जूरं आर्द्रं सोमलतारसम्।
एकीकृत्याग्निसन्धानात् खार्ज्जूरं मद्यमीरितम् ॥
पक्वतालं दन्तिशाकं ककुभञ्च तथैव च।
एतैरेव सुसन्धानात् तालमद्यं प्रकीर्त्तितम् ॥
इक्षुदण्डं मरीचञ्च वदरञ्च तथा दधि।
शेषे तु लवणं दत्त्वा इक्षु मद्यं प्रकीर्त्तितम् ॥
नवं मधु तथा विल्वं पक्वं शर्करया सह।
सन्धानाज्जायते मद्यं माध्वीकं शरतो रसम् ॥
शतावरी टङ्कमूलं लक्ष्मणं पद्ममेव च।
मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम् ॥
मालूरमूलं वदरी शर्करा च तथैव च।
एषामेकत्र सन्धानात् मैरेयं मद्यमीरितम् ॥
इन्द्रजिह्वा पक्वधात्री नारिकेलजलन्तथा।
कदलीफलसन्धानान्मद्यं तन्नारिकेलजम् ॥
दधि त्रैलोक्यविजया तथैव च करीकणा।
गुड़ेन सह सन्धानात् गौड़ीमद्यं प्रकीर्त्तितम् ॥
शष्कुलीमर्हसिद्धान्नपुष्पोदकसमन्वितम्।
वह्नौ सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयम् ॥
शेषेऽहनि तु संप्राप्ते जीवनं तत्र निःक्षिपेत्।
शृङ्गवेरं मरीचञ्च मातुलङ्गं तथैव च।
एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम् ॥"

इति श्रीमत्स्यसूक्ते महातन्त्रे चतुर्व्विंशति-साहस्रे ३६ पटलः ॥ * ॥ अपि च।

"सिद्धमन्त्री भवेद्वीरो न वीरो मद्यपानतः।
कलौ तु भारते वर्षे लोका भारतवासिनः ॥
गृहे गृहे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि ॥"

इति उत्पत्तितन्त्रे ६४ पटलः ॥ * ॥

"दिव्यवीरमयो भावः कलौ नास्ति कदाचन।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम् ॥"

इति महानिर्व्वाणतन्त्रम् ॥ * ॥

श्रीक्रमे।
"न दद्याद् ब्राह्मणो मद्यं महादेव्यै कथञ्चन।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत् ॥

भैरवतन्त्रे।
"नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु।
राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन ॥
एवं प्रदानमात्रेण हीनायुर्ब्राह्मणो भवेत्।

इति आगमतत्त्वविलासः ॥ * ॥

स्मृतौ कलौ मद्यपानादिनिषेधो यथा, याज्ञवल्क्यदीपकलिकायां ब्रह्मपुराणम्।
"नराश्वमेधौ मद्यञ्च कलौ वर्ज्ज्या द्विजातिभिः॥"
निषेधविषयं स्पष्टयति उशनाः। "मद्यमदेयमपेयमनिग्राह्यम्।" अनिग्राह्यमस्वीकार्य्यमिति कल्पतरुः॥ कालिकापुराणेऽपि।
"खगानरुधिरं दत्त्वा आत्महत्यामवाप्नुयात्।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥"

स्मृतिः।
"ताम्रे चेक्षुरसो मद्यं पयसा यवचूर्णकम्।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ॥
अतो मद्यप्रतिनिधिदानमपि न युक्तम्। इति तिथ्यादितत्त्वम् ॥ * ॥ मद्यतुल्यं यथा,—
"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं
मधु।